# bhaktechChApUrtikaraM haristotram or athavA vegAsetustotram

# ભક્તેચ્છાપૂર્તિકરં હરિસ્તોત્રમ્ અથવા વેગાસેતુસ્તોત્રમ્

## Document Information

Text title : haristotram bhaktechChApUrtikaram

File name : haristotrambhaktechChApUrtikaram.itx

Category : vishhnu, vedAnta-deshika, vishnu

Location : doc_vishhnu

Author : vedAntadeshika

Proofread by : PSA Easwaran, NA

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : October 2, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 2, 2021

*sanskritdocuments.org*

bhaktechChApUrtikaraM haristotram or athavA vegAsetustotram

# ભક્તેચ્છાપૂર્તિકરં હરિસ્તોત્રમ્ અથવા વેગાસેતુસ્તોત્રમ્

યથોક્તકારિસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
એકં વેગવતીમધ્યે હસ્તિશૈલે ચ દૃશ્યતે ।
ઉપાયફલભાવેન સ્વયં વ્યક્તં પરં મહઃ ॥ ૧॥

ઈષ્ટે ગમયિતું પારમેષ સેતુરભઙ્ગુરઃ ।
યત્ર સારસ્વતં સ્રોતો વિશ્રામ્યતિ વિશૃઙ્ખલમ્ ॥ ૨॥

જયતિ જગદેકસેતુર્વેગવતીમધ્યલક્ષિતો દેવઃ ।
પ્રશમયતિ યઃ પ્રજાનાં પ્રથિતાન્સંસારજલધિકલ્લોલાન્ ॥ ૩॥

વિભાતુ મે ચેતસિ વિષ્ણુસેતુર્વેગાપગાવેગવિઘાતહેતુઃ ।
અમ્ભોજયોનેર્યદુપજ્ઞમાસીદભઙ્ગરક્ષા હયમેધદીક્ષા ॥ ૪॥

ચતુરાનનસપ્તતન્તુગોપ્તા સરિતં વેગવતીમસૌ નિરુન્ધન્ (સમયે તત્પરિપન્થિનો નિરુન્ધન્)
પરિપુષ્યતિ મઙ્ગલાનિ પુંસાં ભગવાન્ ભક્તિમતાં યથોક્તકારી ॥ ૫॥

શ્રીમાન્પિતામહવધૂપરિચર્યમાણઃ શેતે ભુજઙ્ગશયને સ મહાભુજઙ્ગઃ ।
પ્રત્યાદિશન્તિ ભવસઞ્ચરણં પ્રજાનાં ભક્તાનુગન્તુરિહ યસ્ય ગતાગતાનિ ॥ ૬॥

પ્રશમિતહયમેધવ્યાપદં પદ્મયોનેઃ
    શ્રિતજનપરતન્ત્રં શેષભોગે શયાનમ્ ।
શરણમુપગતાસ્સ્મઃ શાન્તનિશ્શેષદોષં
    શતમખમણિસેતું શાશ્વતં વેગવત્યાઃ ॥ ૭॥

શરણમુપગતાનાં સોઽયમાદેશકારી
    શમયતિ પરિતાપં સંમુખઃ સર્વજન્તોઃ ।
શતગુણપરિણામઃ સંનિધૌ યસ્ય નિત્યં
    વરવિતરણભૂમા વારણાદ્રીશ્વરસ્ય ॥ ૮॥

કાઞ્ચીભાગ્યં કમલનિલયાચેતસોઽભીષ્ટસિદ્ધિઃ
    કલ્યાણાનાં નિધિરવિકલઃ કોઽપિ કારુણ્યરાશિઃ ।
પુણ્યાનાં નઃ પરિણતિરસૌ ભૂષયન્ભોગિશય્યાં
    વેગાસેતુર્જયતિ વિપુલો વિશ્વરક્ષૈકહેતુઃ ॥ ૯॥

વેગાસેતોરિદં સ્તોત્રં વેઙ્કટેશેન નિર્મિતમ્ ।
યે પઠન્તિ જનાસ્તેષાં યથોક્તં કુરુતે હરિઃ ॥ ૧૦॥

ઇતિ કવિતાર્કિકસિંહ સર્વતન્ત્રસ્વતન્ત્ર શ્રીવેદાન્તદેશિકકૃતં
વેગાસેતુસ્તોત્રં અથવા ભક્તેચ્છાપૂર્તિકરં હરિસ્તોત્રં અથવા
યથોક્તકારિસ્તોત્રં સમ્પૂર્ણમ્ ॥

(કાઞ્ચીક્ષેત્રે વેગવતીતીરે રચિતમ્)

Proofread by PSA Easwaran

---

*bhaktechChApUrtikaraM haristotram or athavA vegAsetustotram*
pdf was typeset on October 2, 2021

Please send corrections to *sanskrit@cheerful.com*